दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रशुक्लदशमी-एकादशी
चैत्र 14 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-155 | 1 | मार्च 28, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 प्रधानमन्त्री नरेन्द्रमोदी आभासीय माध्यमेन सर्वेषां राज्यानां मुख्यमन्त्रिभिः सह उपवेशनं कृतवान्

3 हिमाचले अधुना 'प्ले-स्कूल' इति विद्यालयानां पञ्जीकरणम् अनिवार्यम्, निरीक्षणात् पूर्वं न भविष्यति अनुमतिः

4 प्रधानमन्त्री नरेन्द्र मोदी रविवासरे, २९ मार्च दिनाङ्के प्रातः एकादशवादने आकाशवाणीतः 'मन की बात' कार्यक्रमे स्वविचारान् प्रकटीकरिष्यति

## सर्वासु मिथ्यवार्तासु 'पूर्णविरामः', देशे न भविष्यति 'लॉकडाउन' इति, केन्द्रेण स्पष्टीकृता स्थितिः




हिमसंस्कृतवार्ताः- नवदेहली। केन्द्रीयवित्तमन्त्री निर्मलासीतारमण महोदया डीजल- पेट्रोल इत्यनयोः उत्पादशुल्के (Excise Duty) कृतायाः न्यूनतायाः निर्णयस्य प्रशंसां कुर्वती अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी न इच्छति स्म यत् (पेट्रोलियम पदार्थस्य) आपणिकमूल्यानि (Retail Prices) वर्धेरन्। वित्तमन्त्रिण्या इन्धनस्य न्यूनतां (Shortage) निधाय देशे कोविड-विभुषिकाकालस्य इव 'लॉकडाउन' (तालाबन्दी) स्थापनस्य चर्चाः अपि निराकृताः। सा स्पष्टीकृतवती यत् देशे इन्धनस्य कापि न्यूनता नास्ति, तालाबन्दीसदृशं किमपि न भविष्यति। सीतारामणमहोदया डीजल-पेट्रोल इत्यनयोः उत्पादशुल्के दश- दश रूप्यकाणां कर्तनस्य नूतननिर्णयस्य विषये अवदत् यत् प्रधानमन्त्री इच्छति स्म यत् उपभोक्तॄणां कृते मूल्यानि न वर्धेरन्। सा 'लॉकडाउन' इति चर्चायाः उपरि अवदत्- "अहं जनान् आश्वासयितुम् इच्छामि यत् किमपि 'लॉकडाउन' न भविष्यति... अहं चकिता अस्मि यत् केचन नेतारः कथयन्ति यत् तालाबन्दी भविष्यति तथा इन्धनस्य न्यूनता भविष्यति। एताः वार्ताः निराधाराः (बेबुनियाद) सन्ति।" सा अवदत् यत् राजनैतिकक्षेत्रस्य जनैः क्रियमाणाः एतादृशाः टिप्पण्यः चिन्ताजनकाः सन्ति। कोविड-काले यथा दृष्टं, तादृशं किमपि न भविष्यति।

### किमर्थं न्यूनीकृतं पेट्रोल-डीजल इत्यनयोः उत्पादशुल्कम्?


उत्पादशुल्के कर्तनस्य विषये सा अवदत् यत् पश्चिम- एशिया (West Asia) क्षेत्रे प्रचलतः सङ्घर्षस्य स्थितिं ध्यानं निधाय प्रधानमन्त्रिणा एका गोष्ठी आहूता। तस्यां निश्चितं यत् पेट्रोल, डीजल तथा एटीएफ (विमान-इन्धनम्) इत्यनयोः कापि न्यूनता न भवेत् तथा वैश्विकस्थितेः कारणेन एतेषां मूल्यानि न वर्धेरन्। वित्तमन्त्रिण्या उक्तं- "अद्य वयं एकं निर्णयं स्वीकृतवन्तः, यस्य अन्तर्गतं वयं तैलविपणन- कम्पनीभ्यः (OMCs) साहाय्यं दास्यामः येन ताः अपक्वपदार्थस्य (Raw material) आयातं कर्तुं शक्नुवन्ति, तथा सामान्यजनाः मूल्यवृद्धेः कष्टं न अनुभवेयुः। वयं सुनिश्चितं कुर्मः यत् पेट्रोल- डीजल- विमानइन्धनानां मूल्यानि ऊर्ध्वं न गच्छेयुः।"

## दुर्दशायां स्थितानां महिलानां साहाय्यार्थं सम्पूर्णे देशे षड्विंशत्-अधिक-नवशत-वन-स्टॉप-केन्द्राणि कार्यरतानि सन्ति- महिला-बालविकास-राज्यमन्त्री



सर्वकारः अवदत् यत् दुर्दशायां स्थितानां महिलानां साहाय्यार्थं सम्पूर्णे देशे षड्विंशत्-अधिक-नवशत-वन-स्टॉप-केन्द्राणि कार्यरतानि सन्ति। लोकसभायां एकस्य प्रश्नस्य प्रत्युत्तरे महिला- बालविकास-राज्यमन्त्री सावित्री ठाकुरः उक्तवती यत् एतेषु केन्द्रेषु त्रयोदश-लक्षतः अधिकाः महिलाः सहायिकाः सन्ति। मन्त्रिणा उक्तं यत् सर्वकारः महिलानां सुरक्षां सुनिश्चितं कर्तुं सर्वोच्च-प्राथमिकतां ददाति। ओ.एस.सी. (वन-स्टॉप-केन्द्राणि) इत्येतेषु विविधाः समन्वित-सेवाः प्रदीयन्ते, यथा- चिकित्सा-साहाय्यं, विधि-साहाय्यं, अस्थायी-आवासः, आरक्षक-साहाय्यं, मनोसामाजिक परामर्शः च।

## रक्षामन्त्रालयेन तुङ्गुस्का-वायु-रक्षा-प्रक्षेपण-व्यवस्थायाः तथा पी-8-आई दीर्घपरिधि-समुद्रीय-निरीक्षण-विमानस्य कृते अनुबन्धेषु हस्ताक्षराणि कृतानि



रक्षामन्त्रालयेन तुङ्गुस्का-वायु-रक्षा-प्रक्षेपण-व्यवस्थायाः तथा पी-8-आई दीर्घपरिधि-समुद्रीय-निरीक्षण-विमानस्य कृते अष्टपञ्चाशत्-अधिक-अष्टशत-कोटि-रूप्यकाणां मूल्यस्य अनुबन्धेषु हस्ताक्षराणि कृतानि। मन्त्रालयेन उक्तं यत् पञ्चचत्वारिंशत्-अधिक-चतुःशत-कोटि-रूप्यकाणां मूल्यस्य तुङ्गुस्का-वायु-रक्षा-प्रक्षेपणयन्त्र-व्यवस्थायाः क्रयणार्थं अनुबन्धः रूसदेशस्य जे.एस.सी. रोसोबोरोनएक्सपोर्ट इत्यनेन सह रक्षासचिवस्य राजेशकुमारसिंहस्य उपस्थितौ हस्ताक्षरितः। एताः अत्याधुनिक प्रक्षेपण्यः विमान-ड्रोन्, क्रूज़-प्रक्षेपण इत्यादीनां ड्रॉन-यन्त्राणां प्रतिकारार्थं देशस्य बहुस्तरीय-वायु-रक्षा-क्षमताम् अधिकं सुदृढं करिष्यन्ति। मन्त्रालयेन उक्तं यत् एषा सन्धिः भारत-रशिया-सामरिक-रक्षा-सहभागित्वं अधिकं सुदृढं करिष्यति।

## बालेन्द्रशाहः नेपालस्य प्रधानमन्त्री-रूपेण शपथग्रहणं स्वीकृतवान्



राष्ट्रियस्वतन्त्रपार्टीति दलस्य संसदीयदलस्य नेता बालेन्द्रशाहः नेपालस्य लोकतान्त्रिकरूपेण निर्वाचितः प्रधानमन्त्री रूपेण शपथग्रहणं स्वीकृतवान्। देशस्य कनिष्ठतमः प्रधानमन्त्री जातः पञ्चत्रिंशत् वर्षीयः आर्. एस्. पी. इति दलस्य नेता शीतल निवास-नगरस्य राष्ट्रपति-कार्यालये राष्ट्रपतिना रामचन्द्रपौडेल् इत्यनेन द्वारा पदस्य गोपनीयतायाः च शपथं स्वीकृतवान्। इतः प्राक्, सद्यैव समाप्ते संसदीयनिर्वाचने बहुमतेन व्यापकं विजयं प्राप्य आर्. एस्. पि. दलेन श्रीशाहं संसदीयदलस्य नेतृत्वेन निर्वाचितं, येन सः देशस्य सप्त चत्वारिंशत्तमः प्रधानमन्त्री अभवत्। भ्रष्टाचारस्य, परिवारवादस्य, सामाजिक-अन्तर्जाल प्रतिबन्धस्य च विरुद्धं यूनां नेतृत्वे जेन-जी-इत्यस्य विरोधस्य अनन्तरं, पूर्वप्रधानमन्त्रिणः के. पी. शर्मा ओली-वर्यस्य नेतृत्वे संयुक्त सर्वकारः गतवर्षे सितम्बर-मासे निष्कासितः, ततः परं, श्रीशाहः प्रथमः लोकतान्त्रिकरूपेण निर्वाचितः प्रधानमन्त्री अस्ति यः शपथं स्वीकृतवान्।

## सुभाषितम्

**इष्टं ददाति गृह्णाति, कार्यमाख्याति पृच्छति।**
**भुङ्क्ते भोजयते चैव, षड्विधं मित्रलक्षणम्।।**

एक सच्चे मित्र के ये छः लक्षण होते हैं। मांगी गई वस्तु समय पर देता है। दी गई वस्तु को आदरपूर्वक ग्रहण करता है, कार्य को स्पष्ट व्यक्त कर देता है, पूछता है, अपने मित्र के साथ सहभोज करता है तथा अपने मित्र को भी भोजन के लिए आमन्त्रित करता है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## राज्यसभायां वित्तविधेयक-मादायविचारार्थं लोकसभायै प्रत्यावर्तनार्थं च स्वीकृतम्



राज्यसभायां षड्विंशत्यधिक-द्विसहस्रतमवर्षस्य वित्त विधेयकमादाय विचारार्थं लोकसभायै प्रत्यावर्तनार्थं च स्वीकृतम्। एतत् विधेयक षड्विंशत्यधिक-द्विसहस्रतम-वर्षतः सप्तविंशत्यधिक-द्विसहस्रतम-वित्तवर्षस्य कृते केन्द्रसर्वकारस्य वित्तीय-प्रस्तावान् कार्यान्वितुं प्रयुज्यते। लोकसभायां वित्तराज्य-मन्त्री पङ्कजचौधरी इत्यनेन एतत् विधेयकं पुरःस्थापितम्।

# हिमाचल- विधानसभासत्रम्: हिमकेयर- योजनाविषये सदनं तप्तम्, मुख्यमन्त्रि- विपक्षनेतृभ्यां मध्ये तीक्ष्णवाग्युद्धम्



**हिमसंस्कृतवार्ताः- शिमला।** शुक्रवासरे विधानसभायां हिमकेयर-योजनां लेकर मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खु महोदयस्य तथा विपक्षनेतुः जयरामठाकुर महोदयस्य मध्ये महान् वादविवादः अभवत्। प्रश्नकालानन्तरं जयरामठाकुरः उक्तवान् यत् मुख्यमन्त्री समरहिलक्षेत्रे कस्यचित् छात्रनेतुः इव असत्यं वदति। अस्य प्रत्युत्तरे मुख्यमन्त्री अवदत् यत् पूर्वतनभाजपासर्वकारस्य समये पुरुषेभ्यः अपि गर्भाशय- शस्त्रक्रियायाः (Hysterectomy) बिलानि निर्मितानि। अनेन विषयेण द्वयोः नेतृभ्योः मध्ये तीक्ष्णविवादः जातः।

## भाजपा-शासने जनानां नेत्रेषु 'एक्सपायरी' लेन्स- आरोपणम्- मुख्यमन्त्री

मुख्यमन्त्री सुक्खु महोदयः उक्तवान् यत् हिमकेयर-योजनायाः आन्तरिक-अङ्केक्षणे १०० कोटीनां भ्रष्टाचारः प्रकटितः। सः आरोपं कृतवान् यत् भाजपाशासने रुग्णानां नेत्रेषु कालावधि-समाप्त लेन्सयन्त्राणि आरोपितानि। योजनायाः विजिलेंस- जाँच- आदेशात् विपक्षः व्याकुलः अस्ति। सः अवदत् यत् सर्वकारः हिमकेयर-सदृशीं नवीनां योजनाम् आनेतुं विचारं करोति।

## भ्रष्टचारस्य जाचं 'सिटिंग जज' द्वारा कारयतु, मुख्यमन्त्री क्षमां याचताम्- जयरामः

विपक्षनेता जयरामठाकुरः अवदत् यत् मुख्यमन्त्री मिथ्यारोपं करोति। सः उक्तवान् यत् भाजपा-काले ४४१ कोट्यः व्ययिताः, परन्तु कांग्रेस-शासने ९७२ कोट्यः व्ययिताः सन्ति, येषु ३९१.२७ कोटीनां देयता अद्यापि अवशिष्टा अस्ति। सः अयाचत यत् अस्य प्रकरणस्य जाचं उच्चन्यायालयस्य वर्तमानन्यायाधीशेन कारयतु। जयरामः उक्तवान् यत् मुख्यमन्त्री सदनं भ्रमितं कृतवान्, अतः सः प्रदेशस्य जनैः सह क्षमां याचताम्।

## अन्ये प्रमुखाः विषयाः-

•चिकित्सालयदेयताः स्वास्थ्यमन्त्री धनीरामशाण्डिलः सूचितवान् यत् हिमकेयर-योजनान्तर्गतं चिकित्सालयानां ३९१.२७ कोटीनां धनं दातव्यं अस्ति। ७० आदर्श-स्वास्थ्यसंस्थानेषु केवलं १९ संस्थानेषु 'रेडियोलॉजिस्ट' नियुक्ताः सन्ति।

•मार्गनिर्माणम् (FDR Technique): लोकनिर्माणमन्त्री विक्रमादित्यसिंहः उक्तवान् यत् पीएमजीएसवाई-तृतीयचरणे ६३ मार्गाणां निर्माणं FDR तन्त्रज्ञानेन क्रियते, यस्य कृते ६७६.४२ कोट्यः स्वीकृताः।

•पीएम आवासयोजनाः पञ्चायतीराजमन्त्री अनिरुद्धसिंहः उक्तवान् यत् प्रदेशे ३८,४२१ गृहाणां निर्माणकार्यम् अद्यापि अपूर्णम् अस्ति।

•HRTC मार्गविच्छेदः: उपमुख्यमन्त्री मुकेशअग्निहोत्री सूचितवान् यत् हानिकारणात् एचआरटीसी-संस्थायाः १२७ मार्गाः स्थगिताः, येषु ३४ मार्गाः निजीचालकेभ्यः दत्ताः।

# प्रधानमन्त्री नरेन्द्रमोदी आभासीय माध्यमेन सर्वेषां राज्यानां मुख्यमन्त्रिभिः सह उपवेशनं कृतवान्



प्रधानमन्त्री नरेन्द्रमोदी आभासीय माध्यमेन सर्वेषां राज्यानां मुख्यमन्त्रिभिः सह उपवेशनं कृतवान् । यस्मिन् पश्चिम-एशिया द्वन्द्वस्य सन्दर्भ तेषां सज्जता योजनाः च समीक्षिता । अस्य संवादस्य मुख्योद्देश्यं 'टीम्-इण्डिया' इति भावेन संयुक्तरूपेण कार्य सुनिश्चितं करणीयम् अस्ति। परन्तु, येषु राज्येषु 'आचारसंहिता' प्रवर्तितास्ति तेषां मुख्यमन्त्रिणः अस्यां सभायां सहभागिनः नैव भविष्यन्ति।

## पेट्रोल, डीजल तथा एवियेशन-टर्बाइन-फ्यूल (ए.टी.एफ.) इत्येतयोः मूल्येषु वृद्धिः न भवेत्- केन्द्रीय वित्तमन्त्री

केन्द्रीय-वित्तमन्त्री निर्मला सीतारमनः अवदत् यत् पेट्रोल, डीजल तथा एवियेशन-टर्बाइन-फ्यूल (ए.टी.एफ.) इत्येतयोः मूल्येषु वृद्धिः न भवेत् इति सर्वकारः सुनिश्चितं करोति। नवदेहली-नगरे प्रसारमाध्यमैः सह वार्तालापं कुर्वती श्रीमती सीतारामनः अवदत् यत् पश्चिम-एशियायाः वर्तमान-संघर्ष-स्थितिं दृष्ट्वा प्रधानमन्त्रिणा नरेन्द्रमोदिना एकं उपवेशनं आयोजितम्। तस्मिन् सम्मेलने निर्णयः कृतः यत् डीज़ल तथा ए.टी.एफ. इत्येतयोः अभावः न भवेत्, तथा च वैश्विक स्थितेः प्रभावात् तेषां मूल्यानि अपि न वर्धन्ताम् ।

# PMGSY-4- पीएमजीएसवाई इत्यस्य अन्तर्गतं हिमाचलाय २९४ नूतनामार्गाः प्राप्ताः, केन्द्रेण २२४७ कोटिरुप्यकाणि स्वीकृतानि




**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमाचलप्रदेशस्य ग्रामीणक्षेत्रेषु दृढमार्गाणां जालं प्रसारयितुं केन्द्रसर्वकारेण बृहत् उपहारः दत्तः। 'प्रधानमन्त्री- ग्राम- पथयोजना' (PMGSY) इत्यस्याः चतुर्थचरणस्य अन्तर्गतं राज्ये १५३८ किलोमीटर दीर्घाः २९४ नूतनाः मार्गपरियोजनाः हरितसंकेतं प्राप्ताः सन्ति। एतासां परियोजनानां निर्माणार्थं केन्द्रेण प्रायः २,२४७.२४ कोटि- रुप्यकाणां धनराशिः अपि स्वीकृता। इयं महती सूचना केन्द्रीय-ग्रामीण-विकास-राज्यमन्त्री कमलेश- पासवान- महोदयेन संसदि राज्यसभा- सांसदः इन्दुगोस्वामी-महोदयायाः प्रश्ने उत्तररूपेण दत्ता।केन्द्रीयमन्त्रिणा उक्तं यत् प्रधानमन्त्री-ग्राम- पथ- योजनायाः अन्तर्गतं समतलक्षेत्रेषु ५०० तः न्यूनजनसंख्यायुक्तानां, पर्वतीयक्षेत्रेषु २५० तः न्यूनजनसंख्यायुक्तानां ग्रामाणां कृते योजना अस्ति। नक्सल-हिंसा-प्रभावितेषु क्षेत्रेषु १०० तः न्यूनजनसंख्यायुक्तानां ९ विशेषश्रेणी- राज्याणां/ केन्द्रशासितप्रदेशानां तेषां २५००० ग्रामाणां मार्च २०२९ पर्यन्तं वर्षपर्यन्तं मार्गसुविधया सह योजनस्य लक्ष्यं वर्तते, ये अधुना यावत् मार्गसुविधायाः वञ्चिताः सन्ति। सः अवदत् यत् अस्याः योजनायाः उद्देश्यं ग्रामीणजनानां कृते विपण्या (Market), स्वास्थ्यकेन्द्राणां, शिक्षासंस्थानां विकासकेन्द्राणां च सुलभता प्रदानं वर्तते, येन ते राष्ट्रस्य मुख्यधाराया सह जोडिताः भवेयुः आधुनिकसुविधानां च उपयोगं कर्तुं शक्नुयुः। केन्द्रीयमन्त्रिणा स्पष्टं कृतं यत् अस्याः योजनायाः अन्तर्गतं मार्गाणां स्तरोन्नयनस्य प्रावधानं न कृतम् अस्ति। सः सूचितवान् यत् केन्द्रसर्वकारेण वर्षे २००० मध्ये आरब्धायाः अस्याः योजनायाः अन्तर्गतं ग्रामीणक्षेत्राणि वर्षपर्यन्तं मार्गैः सह योजयितुं एकमुश्त-केन्द्रीय-साहाय्यस्य (One time central assistance) प्रावधानं कृतम् अस्ति।

# भारतस्य मुख्यन्यायाधीशः डा. सूर्यकान्तः केन्द्रशासितप्रदेशस्य लद्दाखस्य चतुर्दिवसीय-यात्रायां लेह-नगरं सम्प्राप्तवान्



भारतस्य मुख्यन्यायाधीशः डा. सूर्यकान्तः केन्द्रशासितप्रदेशस्य लद्दाखस्य चतुर्दिवसीय यात्रायां लेह-नगरं सम्प्राप्तवान्। लेह-नगरस्य खुशुक-बकुला-रिनपोचे-विमानस्थानके लद्दाखी-पारम्परिक रीत्या भव्यं स्वागतम् अभवत्, लद्दाख-यात्रायाः आरम्भे सः गार्ड-आफ्-आनर् अपि स्वीकृतवान्। भ्रमणकाले श्रीकान्तः लेह-कार्गिल-नगरयोः नवनिर्मितानां मण्डल-न्यायालय-भवनानां उद्घाटनं करिष्यति, येन केन्द्र-शासित प्रदेशे न्यायिक-आधारभूत संरचनायाः महती वृद्धिः भविष्यति।

# धोलीमाता-मन्दिरे सहस्रशः श्रद्धालवः शिरं नमन्ति



**हिमसंस्कृतवार्ता।** बड़ूखर कांगड़ाक्षेत्रे प्रसिद्धे शक्तिपीठे धोलीमाता- मन्दिरे रामनवमी-पावनः उत्सवः महता उल्लासेन श्रद्धया च आचरितः। प्रातःकालात् एव भक्तजनानां समूहाः भजन-कीर्तनं कुर्वन्तः मन्दिरं प्रति गन्तुम् आरब्धवन्तः।अस्मिन् अवसरे पण्डितेन विधिवत् मन्त्र-उच्चारणेन सर्वप्रथमं भगवान् गणपतिः पूजितः, ततः अनन्तरं नवग्रहाणां पूजा सम्पन्ना। तदनन्तरं अग्निदेवाय दशांश-आहुति समर्पिता। समग्रे आयोजने भक्तजनानां गाढश्रद्धा उत्साहश्च दृष्टः। अन्ते प्रसादरूपेण श्रद्धालवः भक्त्या लङ्गरं ग्रहणवन्तः।

# हिमाचल-विधानसभा-सत्रम्- भाजपेति दलेन

## प्रश्नकाले भागं न गृहीतम्, सर्वकारं प्रति विरोधः प्रकटितः

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश-विधानसभायाः बजटसत्रस्य शुक्रवासरीये प्रश्नकाले भाजपा-विधायकाः सम्मिलिताः न अभवन्। यद्यपि सर्वे विधायकाः सदनस्य अन्तः एव आसन्, किन्तु सर्वकारं प्रति विरोधं प्रकटयन्तः ते प्रश्नान् न पृष्टवन्तः। प्रश्नकालात् पूर्वं विपक्षनेता जयरामठाकुरः 'प्वाइण्ट ऑफ आर्डर' इत्यस्य अन्तर्गतं वक्तुम् अध्यक्षं कुलदीपसिंहपठानीया महोदयं प्रार्थितवान्। अध्यक्षेण उक्तं यत् प्रश्नकालस्य अनन्तरं वक्तुं अवसरः दास्यते। अनेन क्रुद्धाः विपक्ष-सदस्याः स्वप्रश्नान् न पृष्टवन्तः।

### माता-चिन्तपूर्णी-चरणेषु २.९८ कोटि-रूप्यकाणां विदेशीमुद्रा अर्पिता

काङ्ग्रेस-विधायकस्य राकेशकालिया महोदयस्य प्रश्नस्य उत्तरे उपमुख्यमन्त्री मुकेश अग्निहोत्री अवदत् यत् माता-चिन्तपूर्णी-मन्दिरे उपहाररूपेण २.९८ कोटि-रूप्यकाणां विदेशी-मुद्रा प्राप्ता अस्ति। अस्याः मुद्रायाः गणना प्रतिदिनं 'अर्पण-पञ्जिकायाम्' क्रियते, तदनन्तरं भारतीय-मुद्रायां परिवर्तयितुं एसबीआई (SBI) शाखां प्रति प्रेष्यते। मन्दिरे डॉलर, पौण्ड, दीरम, दिनार-सदृशाः विविध-मुद्राः अर्पिताः भवन्ति।

### 'स्मार्ट-विद्युत्मापक' विषये समस्या अस्ति चेत् कार्यालये सूचनां ददतु

मुख्यमन्त्री अवदत् यत् 'स्मार्ट-विद्युत्-मापक' (Smart Meter) योजना केन्द्रसर्वकारस्य अस्ति। सर्वे मापकाः केन्द्रसर्वकारस्य मानकानुसारं स्थाप्यन्ते। यदि उपभोक्तृभ्यः अधिकं 'विद्युत्-देयकम्' (Bill) प्राप्यते, तर्हि ते स्वविभागे सूचनां दातुं शक्नुवन्ति। आरडीएसएस (RDSS) योजनायाः अवधिः दिसम्बर-२०२७ पर्यन्तं वर्धिता अस्ति। यदि मापकाः न स्थाप्यन्ते, तर्हि केन्द्रस्य अनुदानं 'ऋण' रूपेण परिवर्तयिष्यते।

### महाविद्यालयेषु छात्रसङ्ख्यां वर्धयितुं शिक्षामन्त्रिणः - आह्वानम्

शिक्षामन्त्री रोहितठाकुरः विधायकैः स्वक्षेत्रस्य महाविद्यालयेषु छात्र-नामाङ्कनं वर्धयितुं प्रार्थितवान्। सः अवदत् यत् मण्डी-रामपुर-सीमा सदृश-विशाल- महाविद्यालयेषु अपि प्रवेश-सङ्ख्या न्यूना जाता अस्ति, अतः ७५ तः न्यून-छात्रयुक्तानां महाविद्यालयानां 'विलयः' (Merger) करणीयः भवति। नालागढ़-विधायकः हरदीपसिंहबावा अवदत् यत् रामशहर-महाविद्यालये नूतन-भवनस्य ७० प्रतिशतं कार्यं पूर्णं जातम्, तस्य शीघ्रसमाप्तौ प्रवेशाः वर्धिष्यन्ते।

### मजारी-अन्नविपण्यां गोधूम-क्रयणस्य अभ्यर्थना

श्री-नयनादेवी-विधायकः रणधीरशर्मा शून्यकाले मजारीग्रामे अन्नविपण्याः पिधानस्य विषयं उत्थापितवान्। सः अवदत् यत् २०१२ तमे वर्षे स्थापिता इयं विपणी सम्प्रति पिहिता अस्ति, येन कृषकाः पञ्जाब-राज्यस्य विपणीषु स्वगोधूमं विक्रेतुं विवशाः सन्ति। अतः अस्मिन् ऋतौ एव अत्र क्रयणप्रक्रिया आरभणीया।

### विद्युत्-परियोजनायै विना अनुमतिं मार्गनिर्माणम्

आनीविधायकः लोकेन्द्रकुमारः शून्यकाले 'बागीपुल- जलविद्युत्- परियोजनायाः' विषयं उत्थापितवान्। सः आरोपं कृतवान् यत् एफसीए (FCA) अनुमतिं विना मार्गाः निर्मीयन्ते, येन ४०० बीघा-परिमितं भूक्षेत्रं ७ घराटाः (Water mills) च प्रभाविताः भवन्ति।

# कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयस्य छात्रायाः ख्यातश्रीशर्मणः राष्ट्रियस्तरे महती उपलब्धिः



**हिमसंस्कृतवार्ता डॉ . निशिकान्तपाण्डेयः नलबारी (असम):** असमराज्यस्य नलबारीमण्डले स्थितस्य प्रतिष्ठितस्य कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययन-विश्वविद्यालयस्य पञ्चवर्षीय-एकीकृत-संस्कृत-पाठ्यक्रमस्य सर्वदर्शनविभागस्य छात्रा ख्यातश्री शर्मा स्वप्रतिभया विश्वविद्यालयस्य गौरवम् अवर्धयत्। सा केन्द्रीयसंस्कृतविश्वविद्यालयेन आयोजितायां राष्ट्रस्तरीयायां 'ऑनलाइन-संस्कृत-ओलम्पियाड' इति स्पर्धायां 'भारतीय-ज्ञान-परम्परा' (IKS) इति विभागे राज्यस्तरे प्रथमं स्थानं प्राप्य सुवर्णपदकं प्राप्तवती। अस्याः स्पर्धायाः पञ्जीकरणप्रक्रिया २०२४ तमे वर्षे एव आरब्धा आसीत्, किन्तु मुख्यप्रतियोगिता २०२५ तमवर्षस्य अगस्तमासस्य १२ दिनाङ्के आयोजिता। स्पर्धायाः मुख्यविषयाः वेदः, संस्कृतसाहित्यम्, व्याकरणम्, ज्योतिषं च आसन्। एतेषां विषयाणाम् आधारेणैव छात्राणां परीक्षणं कृतम्। ख्यातश्रीशर्मणः कृते एषा परीक्षा अतीव महत्त्वपूर्णा आसीत्, यत्र सा ६० निमेषाणाम् अल्पसमये एव १०० अङ्केभ्यः ८४ अङ्कान् सम्पाद्य स्वविद्वत्तायाः परिचयम् अददात्।

स्पर्धायाः परिणामः २०२५ तमवर्षस्य सितम्बरमासे घोषितः। परिणामानुसारं सा राज्यस्तरे विद्यालयीयवर्गे (State School Level) प्रथमस्थानं प्राप्तुं सफला अभवत्। पुरस्काररूपेण केन्द्रीय-विश्वविद्यालयेन तस्यै एकं स्वर्णपदकम् , अभ्यासपुस्तिका, लेखनी तथा च एका ई-मानपत्रं प्रदत्तम्। एते पुरस्काराः पञ्चविंशति-मार्च-२०२६ (२५/०३/२०२६) दिनाङ्के विश्वविद्यालयस्य आदरणीयेन कुलपतिना आचार्यः प्रह्लाद रा जोशीमहोदयेन स्वकरकमलैः तस्यै अर्पिताः।

अस्याः महत्याः उपलब्धेः कारणात् विश्वविद्यालयस्य सर्वदर्शनविभागे तथा च सम्पूर्णे शैक्षणिकक्षेत्रे महान् आनन्दः वर्तते। कुलपतिमहोदयैः सह सर्वे शिक्षकाः ख्यातश्रीशर्मणः उज्ज्वलभविष्याय शुभकामनाः दत्तवन्तः। एषा सफलता न केवलं तस्याः परिश्रमस्य फलम्, अपितु संस्कृतशिक्षायाः क्षेत्रे नूतनयुवावर्गस्य उत्साहस्य प्रतीकम् अपि अस्ति।

# हिमाचले अधुना 'प्ले-स्कूल्' इति विद्यालयानां पञ्जीकरणम् अनिवार्यम्, निरीक्षणात् पूर्वं न भविष्यति अनुमतिः

## निजीविद्यालयानां शुल्कनिर्धारणाय अधिनियमे (Act) भविष्यति संशोधनम्




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशे अधुना 'प्ले-स्कूल' इति स्थापयितुं अन्यविद्यालयावत् पञ्जीकरणं (Registration) अनिवार्यं भविष्यति। ३ तः ६ वर्षपर्यन्तानां बालकानां कृते इयं व्यवस्था क्रियते। अस्य कृते राज्यसर्वकारेण प्रथमवारं 'हिमाचल प्रदेश अर्ली चाइल्डहुड केयर एण्ड एजुकेशन सेण्टर्स रूल्स' (ECCE Rules) निर्मिताः। यद्यपि अस्य कृते २०१७ तमे वर्षे एव अधिनियमः निर्मितः आसीत्, किन्तु नियमाः अधुना अन्तिमाः कृताः। राज्यसर्वकारस्य अनुोदनेन सह अतिरिक्त- मुख्य- सचिवेन एते नियमाः अधिसूचिताः।

### नूतनाः नियमाः दण्डप्रबन्धाश्च

> पञ्जीकरणशुल्कम्- प्ले-विद्यालयानां कृते १५,००० रूप्यकाणि पञ्जीकरणाय तथा १०,००० रूप्यकाणि नवीनीकरणाय (Renewal) निर्धारितानि।

> निरीक्षणम् (Inspection)- पञ्जीकरणात् पूर्वं सुरक्षायाः सुविधानां च निरीक्षणं भविष्यति। अस्य समित्याः अध्यक्षः एसडीएम इति भविष्यति।

> अभिभावक-शिक्षकसङ्घः (PTA)- सामान्यविद्यालयावत् अत्रापि 'पीटीए' सङ्घस्य सङ्घटनस्य अनिवार्यं भविष्यति।

> दण्डः- नियमानां उल्लङ्घने आर्थिकदण्डस्य अपि प्रबन्धः अस्ति।

### निजीविद्यालयानां शुल्कस्य उपरि नियन्त्रणम्

शिक्षामन्त्री रोहितठाकुरः विधानसभायां अवदत् यत् निजीविद्यालयानां शुल्कनिर्धारणाय भविष्ये अधिनियमे (Act) संशोधनं करिष्यते, येन अभिभावकानां शोषणं न भवेत्। उत्तरप्रदेश- कर्नाटक- तमिलनाडु-सदृशानां राज्यानां आधारेण 'शुल्कसंरचना' (Fee Structure) सज्जीकरिष्यते। विधायकस्य रामकुमारस्य प्रश्नस्य उत्तरे मन्त्री अवदत् यत् 'शिक्षाधिकार-अधिनियमस्य' (RTE) अन्तर्गतं २५ प्रतिशतं आसनानि बीपीएल (BPL) श्रेणीबालकेभ्यः आरक्षितानि सन्ति, येषां सङ्ख्या इदानीं द्विगुणिता (Double) जाता अस्ति।

### महाविद्यालय-नामाङ्कनविषये चिन्ता

विधायकस्य हरदीपबाबा महोदयस्य प्रश्नस्य उत्तरे शिक्षामन्त्री अवदत् यत् सर्वकारस्य प्रथमं लक्ष्यं महाविद्यालयेषु छात्रसङ्ख्यावर्धनं तथा आधारभूत- संरचनायाः (Infrastructure) विकासः अस्ति। राजकीय-महाविद्यालय-रामशहर इत्यस्य भवनस्य ७० प्रतिशतं कार्यं पूर्णं जातम्, यस्य समाप्तये मुख्यमंत्री-बजटतः धनं दीयते। मन्त्री चिन्तां प्रकटयन् अवदत् यत् मण्डी, रामपुर, सीमा सदृश- विशाल-महाविद्यालयेषु अपि छात्राणां नामाङ्कनं (Enrollment) न्यूनं जातम्, यत् गम्भीरा चिन्तायाः विषयः अस्ति।

# प्रधानमन्त्रिणः 'मन की बात' कार्यक्रमः




प्रधानमन्त्री नरेन्द्र मोदी रविवासरे, २९ मार्च दिनाङ्के प्रातः एकादशवादने आकाशवाणीतः 'मन की बात' कार्यक्रमे स्वविचारान् प्रकटीकरिष्यति। एषा अस्य मासिक-रेडियो-कार्यक्रमस्य १३२ तमी कडी (सङ्ख्या) भविष्यति। अयं कार्यक्रमः आकाशवाण्याः दूरदर्शनस्य च सम्पूर्ण-जालपटे (Network), 'एआईआर न्यूज' अन्तर्जालपुटे (Website) तथा च 'न्यूज ऑन एआईआर' मोबाइल-तन्त्रांशे (App) प्रसारितः भविष्यति। आकाशवाणी-समाचारस्य, दूरदर्शन-समाचारस्य, प्रधानमन्त्रि-कार्यालयस्य तथा च सूचना-प्रसारण-मन्त्रालयस्य यू-ट्यूब वाहिनिषु अपि अस्य प्रत्यक्ष-प्रसारणं (Live Stream) भविष्यति। आकाशवाणीतः मूल-प्रसारणस्य तत्क्षणमेव 'मन की बात' कार्यक्रमः क्षेत्रीयभाषासु अपि प्रसारितः भविष्यति।

# उत्तराखण्डस्य मुख्यमन्त्रिणः प्रधानमन्त्रिणा सह मेलनम्



उत्तराखण्डस्य मुख्यमन्त्री पुष्कर सिंह धामी नवदिल्ल्यां प्रधानमन्त्रिणा नरेन्द्र मोदी महोदयेन सह मेलनं कृतवान्। मुख्यमन्त्री उत्तराखण्डस्य विकासे केन्द्रसर्वकारस्य सहयोगार्थं प्रधानमन्त्रिणं प्रति कृतज्ञतां प्रकटितवान्।सः राज्ये प्रवर्तमानानाम् अनूल-प्रयासानां (Unique Initiatives) प्रमुखाणां सुधाराणां च विस्तृतं विवरणमपि दत्तवान्। श्रीधामी महोदयः 'रैपिड रेल' परियोजनायाः ऋषिकेशपर्यन्तं विस्तारं कर्तुं तथा च 'दिल्ली-हल्द्वानी' द्रुतमार्गस्य (Expressway) निर्माणार्थं अनुरोधं कृतवान्।

# उपराष्ट्रपतिणः झारखण्डभ्रमणम् - आई.आई.एम. राञ्ची-दीक्षान्तसमारोहः



उपराष्ट्रपतिः सी. पी. राधाकृष्णनः अद्य झारखण्डे भारतीयप्रबन्धन-संस्थानस्य (IIM, Ranchi) पञ्चदशे दीक्षान्तसमारोहे भागं ग्रहीष्यति, तथा च 'वर्चुअल रियलिटी केस रिपॉजिटरी' इत्यस्य उद्घाटनमपि करिष्यति। अस्मिन् अवसरे केन्द्रीय-शिक्षामन्त्री धर्मेंद्र प्रधानः, रक्षा-राज्यमन्त्री संजय सेठः, झारखण्डस्य मुख्यमन्त्री हेमंत सोरेनः, राज्यपालः संतोष कुमार गंगवारः, राज्यसभायाः उपसभापतिः हरिवंश नारायण सिंहः च उपस्थिताः भविष्यन्ति। उपराष्ट्रपतिः अद्य बिरसा मुण्डा विमानपत्तने संपत्स्यते (प्राप्स्यति) ततः सः खूंटी-मण्डलस्य उलिहातु ग्रामं गमिष्यति, यत् जन जातीय-स्वतन्त्रता-सेनानिनः बिरसा मुण्डा महोदयस्य जन्मस्थानम् अस्ति। तत्र सः तस्य वंशजैः सह मेलनं करिष्यति पुष्पाञ्जलिं च अर्पयिष्यति। श्रीराधाकृष्णनः राञ्ची-नगरस्य बिरसा मुण्डा परिसरे तथा च बिरसा चत्वरे स्थितासु बिरसा मुण्डा महोदयस्य प्रतिमासु अपि पुष्पाञ्जलिं अर्पयिष्यति। तदनन्तरं सः आई.आई.एम. राञ्ची इत्यस्य दीक्षान्तसमारोहे मुख्यतिथिरूपेण सम्मिलितः भविष्यति।

# क्रीडामन्त्रिणा हॉकी-क्रीडकाः सम्मानिताः




केन्द्रीय-क्रीडामन्त्री मनसुख मांडविया अद्य नवदिल्ल्यां अष्टमे 'हॉकी इण्डिया' वार्षिक-पुरस्कार-समारोहे क्रीडकान् सम्मानितवान्। अस्मिन् अवसरे डॉ. मांडविया देशं गौरवान्वितं कृतवन्तः क्रीडकान् सम्मानयन् गर्वं प्रकटितवान्। सः उक्तवान् यत् अयं पुरस्कारः जनान् उत्कृष्टताप्राप्तये प्रयासं कर्तुं तथा च देशे क्रीडानां विकासे योगदानं दातुं प्रेरयति प्रोत्साहयति च। क्रीडामन्त्री क्रीडकानां दृढ-समर्पणस्य, असाधारण-कौशलस्य तथा च क्रीडां प्रति तेषाम् उत्साहस्य (Pasion) प्रशंसां कृतवान्।

# हिमाचलस्य पञ्चशक्तिपीठेषु चैत्रनवरात्रस्य उत्साहः: लक्षद्वयाधिकाः भक्ताः नतमस्तकाः



**शिमला।** चैत्रनवरात्र-मेलायाः नवमे दिवसे शुक्रे पञ्चसु प्रमुखशक्तिपीठेषु— चिन्तपूर्णी, ज्वालाजी, नयनादेवी, वज्रेश्वरीदेवी तथा च चामुण्डादेवी मन्दिरेषु प्रायः लक्ष चतुश्चत्वारिंशत् सहस्रं (1,41,000) भक्ताः मातुः दर्शनं कृतवन्तः। नवरात्रोत्सवे सर्वेषु मन्दिरेषु देव्याः विशेषपूजा-अर्चना च प्रचलति।

अष्टमीं तिथिं यावत् चतुर्षु शक्तिपीठेषु भक्तैः ४८ लक्षं ८२ सहस्रं ६१ रूप्यकाणि अर्पितानि। राज्ये सर्वाधिकं धनं श्रीनयनादेवी मन्दिरन्यासाय १७ लक्षं ९९ सहस्रं ८०२ रूप्यकाणि प्राप्तम्। अत्र नवमे दिवसे प्रायः ३० सहस्रं भक्ताः मातुः चरणयोः शीशं नमितवन्तः। मन्दिरन्यासस्य अध्यक्षः संयुक्त-आयुक्तः धर्मपाल चौधरी महोदयः एतस्य पुष्टिं कृतवान्।

**अन्येषु मन्दिरेषु विवरणम्:**

**चिन्तपूर्णी मन्दिरम्-:** अष्टम्यां ३५ सहस्रं भक्ताः आगताः। मन्दिर-अधिकारी संजीव प्रभाकरः अवदत् यत् अष्टमे नवरात्रे ९ लक्षं ९२ सहस्रं ५५० रूप्यकाणि दानेन प्राप्तानि।

**ज्वालाजी मन्दिरम्-:** नवम्यां ४० सहस्रं भक्ताः माथां अवनतवन्तः। मन्दिर-अधिकारी अजय मण्डयालः सूचितवान् यत् अष्टमे दिवसे ११ लक्षं ६९ सहस्रं ३१४ रूप्यकाणि न्यासकोषे संचितानि।

**वज्रेश्वरी देवी (काँगड़ा)-:** नवम्यां २५ सहस्रं भक्ताः उपस्थिताः। मन्दिर-अधिकारिणी शिवाली ठाकुरः अष्टमे दिवसे ९ लक्षं २० सहस्रं ३९५ रूप्यकाणां दानस्य सूचनां दत्तवती।

**चामुण्डा देवी-:** नवमे दिवसे ११ सहस्रं भक्ताः दर्शनं कृतवन्तः। अत्र दानस्य गणना नवरात्रस्य समापनस्य पश्चात् एकदैव भविष्यति।




# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। इस्रायेल-देशे सङ्कटकाले जनानां मेलनार्थं सर्वकारेण एकः नवः तन्त्रांशः निर्मितः।

**काव्या-** किन्तु सर्वकारस्य अयं विचारः जनैः निन्दितः।

**नन्दिनी-** अहो! युद्धकाले अपि एतादृशं कार्यं सर्वकारेण चिन्तितम्, तद् अतीव विचित्रम्!

**नन्दिनी-** बिहारराज्ये अपि एका विचित्रा घटना दृष्टा। मुख्यमन्त्रिणः आगमनात् पूर्वम् एकेन वृषभेण विमानस्थानं प्रविष्टम्।

**नन्दिनी-** तत्र एकः आरक्षकः तेन वृषभेण अनुधावितः।

**काव्या-** हाहा! सा घटना तु अतीव हास्यकरी! अन्या एका वार्ता मया श्रुता।

**काव्या-** एकेन जलपूरी-विक्रेत्रा मासे नवति-सहस्र- रूप्यकाणि अर्जितानि।

**काव्या-** तस्य आयं दृष्ट्वा अन्तर्जाले बहु-विवादः जातः।

**नन्दिनी-** मार्गे भोजन-विक्रेत्रा एतावत् धनं प्राप्तम् इति आश्चर्यम् एव!

**नन्दिनी-** अन्ते, विदेशे निवसता एकेन भारतीयेन स्वस्य दुःखं प्रकाशितम्।

**नन्दिनी-** सः पित्रोः वियोगस्य अपराध-भावम् अनुभूतवान् अस्ति।

**काव्या-** सत्यम्। विदेशे स्थित्वा धनम् अर्जितं किन्तु परिवारस्य सुखं त्यक्तम्।

**काव्या-** तस्य दुःखं मया अवगतम्। अद्यतनः वार्ता-कार्यक्रमः अत्रैव समाप्तः। शुभदिनम्।



।।ॐ।।

"वन्दे संस्कृतमातरम्"

# "लौकिकन्यायकोशः"

## "हंसकाकन्यायः"

पक्षिषु रूपलावण्ययुक्तः हंसः एव खलु। सः कुत्रापि वा भवतु स्वयशः तेन यह भवत्येव। गिरिशिखरेषु वर्तमानाः काकाः किं तेन हंसेन स्पर्धा कुर्युः? एवं सज्जनाः अल्पसंख्याकाः चेदपि विशिष्टं स्थानं वहन्ति इति भावः। यथा-

**इभतुरगशतैः प्रयन्ति मूढा,**
**गुणवन्तो विबुधाश्चलन्ति पद्भ्याम्।**
**पुलिनगतैर्न समेति राजहंसैः।।**

**डा वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**